# वाचस्पत्यम्।

अ

**अ** पु० अवति रक्षति अतति सातत्येन तिष्ठतीति वा अव-अत-वा ड। विष्णौ "अकारोविष्णुरुद्दिष्टउकारस्तु महेश्वरः। मकारस्तु स्मृतोब्रह्मा प्रणवस्तु त्रयात्मक" इति। अस्य (विष्णोः) अपत्यम् अत इञ् इः (कामः) अस्य (विष्णोः) पत्नी ङीप् ई (लक्ष्मी)।

**अ** अव्य० अव-प्रीणनादौ ड स्वरादिपाठादव्ययत्वम्। अभावे, प्रतिषेधे स्वल्पेऽर्थे अनुकम्पायां, सम्बोधने, अ अनन्त!। अधिक्षेपे, अ पचसि त्वं जाल्म!। "उपसर्गस्वरविभक्तिप्रतिरूपकाश्चेति" स्वरादिगणसूत्रे अ इति सिद्धान्तकौमुद्यामुदाहृतं मनोरमायाञ्च अ संबोधने अधिक्षेपे निषेधे चेति व्याख्यातम्। "अभावे नह्यनोन" इत्यमरटीकायां नञादेशोऽयमित्युक्तम्। स च आदेशः नखनमुच्यादिभिन्नशब्दघटके उत्तरपदस्थे हलादौ शब्दे परे भवति। स तु नञर्थे एव स्थानितुल्यार्थकत्वादादेशस्य। नञर्थाश्च

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥

इत्युक्तेः षड्विधाः। तत्र अब्राह्मणइत्यादौ ब्राह्मणसादृश्यवत्त्वेन क्षत्रियादीनां बोधकता, अघटमित्यादौ घटाभावस्य, अपटइत्यादौ पटभिन्नस्य, अनुदरा कन्येत्यादौ अल्पोदरत्वस्य, अपशवो वै अन्ये गोऽश्वेभ्यइत्यादौ गवाश्वभिन्नपशूनामप्राशस्त्यस्य, असुरः असितइत्यादौ च सुरसित विरोधस्य बोधकता। तत्रायं विशेषः नञः सर्व्वत्र अभावे भेदे च शक्तिः सादृश्यादौ तु निरूढलक्षणा। तत्र अघटमित्यादौ अव्ययीभावे, अधन इत्यादौ बहुव्रीहौ भाव कृदन्तोत्तरपदके "अभेदः अज्ञानमित्यादौ" नञ्तत्पुरुषे च अभावबोधकता। भावकृदन्तभिन्नोत्तरपदनञ्तत्पुरुषे तु अघट इत्यादौ भिन्नत्वबोधकतेति। अत्रेदं बोध्यम्। समासे हलादौ उत्तरपदे नञः स्थाने अ इत्यादेशविधानेन समासएवास्य नञर्थकस्य अइत्यस्य प्रयोगः नान्यथा, सम्बोधनाद्यर्थकस्य तु पृथक्प्रयोगः किन्तु "नञोनलोपस्तिङि क्षेपे" इति वार्त्तिकेन तिङन्तपदे परेऽपि नञादेशस्य विधानात् तस्यैव पृथक्प्रयोगः। अधिकं नञ्शब्दार्थावसरे वक्ष्यते। अजीवनिरित्यादौ अधिक्षेपार्थकता अजस्रमित्यादौ उप० स०। तस्य च क्रियायोगात् प्रतिषेधार्थकता।

**अनृणिन्** त्रि० न ऋणी नञ् त० ऋकारस्यात्र हल्त्वाभ्युपगमात् न नुट् नलोपमात्रम्। ऋणिभिन्ने, ऋणशून्ये,।

दिवसस्याष्टमे भागे शाकं पचति यो नरः।
अनृणी चाप्रवासी च स वारिचर! मोदते इति भारतम्

हल्त्वानाश्रयणे नुटि अनृणीत्यपि तत्रैवार्थे।

**अंश** विभाजने अद०चु०उभ०। अंशयति ते आंशिशत् त। अङ्कापयतीतिवत् आपुकि अंशापयतीत्येके। अच् अंशः उ-अंशुः णिनि अंशी क्त अंशितः।

**अंश** पु० अंश-भावेऽच्। विभागे "सकृदंशो निपतति सकृत्कन्या प्रदीयते। सकृदाह ददानीति त्रीण्येतानि सकृत् सकृदिति स्मृतिः। कर्म्मणि अच्। विभाज्ये "द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पितेति" "द्व्यंशहरोऽर्द्धहरो वा पुत्रवित्तार्ज्जनात् पितेति" च स्मृतिः। संख्यासूचकाङ्कविभाज्ये तथाङ्के, च "अन्योन्यहाराभिहतौ हरांशाविति" "अंशाहतिश्छेदवधेन भक्तेति" भजेच्छिदोऽशैरथ तैर्विमिश्रैरिति च लीला०। करणे अच्। अवयवे "अंशुरंशुष्टे देव! सोमाप्यायस्वेति" यजु०। अंशुरंशुः सर्व्वोऽप्यवयव इति वेददीपः। "अंशिनः स्वांशगात्यन्ताभावं प्रति मृषात्मतेति" वेदान्तपरि०। "अंशो नानाव्यपदेशादिति" शारीरक सूत्रम्, जीवस्य निरवयवब्रह्मावयवत्वाभावमाशङ्क्य भाष्य कृता अंश इवेति व्याख्यातम्। तत्समानार्थकं "ममैवांशो जीवलोके जीवभूतः सनातन" इति गीतावाक्यम्। "चतुर्द्दश्यष्टमांशे च क्षीणो भवति चन्द्रमाः अमावास्याष्टमांशे च ततः किल भवेदणुरिति, स्मृतिः। विशेषावयवे, राशिचक्रस्य षष्ट्युत्तरशतत्रयधा विभाजके भागे, राशेस्त्रिंशद्भा